# ॥ श्रीव्यासाचार्याष्टोत्तरशतनामावलिः ॥

ॐ नारायणकुलोद्भूताय नमः
ॐ नारायणपराय नमः
ॐ वराय नमः
ॐ नारायणावताराय नमः
ॐ नारायणवशंवदाय नमः
ॐ स्वयम्भूवंशसम्भूताय नमः
ॐ वसिष्ठकुलदीपकाय नमः
ॐ शक्तिपौत्राय नमः
ॐ पापहन्त्रे नमः
ॐ पराशरसुताय नमः १०
ॐ अमलाय नमः
ॐ द्वैपायनाय नमः
ॐ मातृभक्ताय नमः
ॐ शिष्टाय नमः
ॐ सत्यवतीसुताय नमः
ॐ स्वयमुद्भूतवेदाय नमः
ॐ चतुर्वेदविभागकृते नमः
ॐ महाभारतकर्त्रे नमः
ॐ ब्रह्मसूत्रप्रजापतये नमः
ॐ अष्टादशपुराणानां कर्त्रे नमः २०
ॐ श्यामाय नमः
ॐ प्रशिष्यकाय नमः
ॐ शुकताताय नमः
ॐ पिङ्गजटाय नमः
ॐ प्रांशवे नमः
ॐ दण्डिने नमः
ॐ मृगाजिनाय नमः
ॐ वश्यवाचे नमः
ॐ ज्ञानदात्रे नमः
ॐ शङ्करायुःप्रदाय नमः ३०
ॐ शुचये नमः
ॐ मातृवाक्यकराय नमः
ॐ धर्मिणे नमः
ॐ कर्मिणे नमः
ॐ तत्त्वार्थदर्शकाय नमः
ॐ सञ्जयज्ञानदात्रे नमः
ॐ प्रतिस्मृत्युपदेशकाय नमः
ॐ सर्वधर्मोपदेष्ट्रे नमः
ॐ मृतदर्शनपण्डिताय नमः
ॐ विचक्षणाय नमः ४०
ॐ प्रहृष्टात्मने नमः
ॐ पर्वपूज्याय नमः
ॐ प्रभवे नमः
ॐ मुनये नमः
ॐ वीराय नमः
ॐ विश्रुतविज्ञानाय नमः
ॐ प्राज्ञाय नमः
ॐ अज्ञाननाशनाय नमः

ॐ ब्राह्मकृते नमः
ॐ पाद्मकृते नमः ५०
ॐ धीराय नमः
ॐ विष्णुकृते नमः
ॐ शिवकृते नमः
ॐ श्रीभागवतकर्त्रे नमः
ॐ भविष्यरचनादराय नमः
ॐ नारदाख्यस्य कर्त्रे नमः
ॐ मार्कण्डेयकराय नमः
ॐ अग्निकृते नमः
ॐ ब्रह्मवैवर्तकर्त्रे नमः
ॐ लिङ्गकृते नमः ६०
ॐ वराहकृते नमः
ॐ स्कान्दकर्त्रे नमः
ॐ वामनकृते नमः
ॐ कूर्मकर्त्रे नमः
ॐ मत्स्यकृते नमः
ॐ गरुडाख्यस्य कर्त्रे नमः
ॐ ब्रह्माण्डाख्यपुराणकृते नमः
ॐ उपपुराणानां कर्त्रे नमः
ॐ पुराणाय नमः
ॐ पुरुषोत्तमाय नमः ७०
ॐ काशिवासिने नमः
ॐ ब्रह्मनिधये नमः
ॐ गीतादात्रे नमः
ॐ महामतये नमः

ॐ सर्वज्ञाय नमः
ॐ सर्वसिद्धये नमः
ॐ सर्वशास्त्रप्रवर्तकाय नमः
ॐ सर्वाश्रयाय नमः
ॐ सर्वहिताय नमः
ॐ सर्वस्मै नमः ८०
ॐ सर्वगुणाश्रयाय नमः
ॐ विशुद्धाय नमः
ॐ शुद्धिकृते नमः
ॐ दक्षाय नमः
ॐ विष्णुभक्ताय नमः
ॐ शिवार्चकाय नमः
ॐ देवीभक्ताय नमः
ॐ स्कन्दरुचये नमः
ॐ गणेशादृते नमः
ॐ योगविदे नमः ९०
ॐ पैलाचार्याय नमः
ॐ ऋचः कर्त्रे नमः
ॐ शाकल्यार्याय नमः
ॐ याजुषाय नमः
ॐ जैमिन्यार्याय नमः
ॐ सामकर्त्रे नमः
ॐ सुमन्त्वार्याय नमः
ॐ अथर्वकृते नमः
ॐ रोमहर्षणसूतार्याय नमः
ॐ लोकाचार्याय नमः १००

ॐ महामुनये नमः
ॐ व्यासकाशीरतये नमः
ॐ विश्वपूज्याय नमः
ॐ विश्वेशपूजकाय नमः
ॐ शान्ताय नमः
ॐ शान्ताकृतये नमः
ॐ शान्तचित्ताय नमः
ॐ शान्तिप्रदाय नमः १०८

॥ इति श्री-व्यासाष्टोत्तरशतनामावलिः सम्पूर्णा ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Vyasa_Ashtottara_Shatanamavali.

generated on **August 23, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits